# 2023

## SANSKRIT — HONOURS

**Paper : DSE-A-3**

**(Vyākaraṇa)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

सर्वेषां प्रश्नानामुत्तरं ***संस्कृतभाषया देवनागरलिप्या*** च देयम्।

### Section – A

**(Marks : 20)**

MURALIDHAR GIRLS' COLLEGE
LIBRARY

1. अधोलिखितेषु शब्दयुगलेषु यथेच्छं ***द्वयोः*** अर्थपार्थक्यं निरूप्यताम्। 5×2

   (a) शूद्रा शूद्री च।

   (b) त्रिफला त्रिफली च।

   (c) पतिवत्नी पतिमती च।

   (d) यवानी यवनानी च।

2. अधोलिखितेषु यथेच्छं ***पञ्चानां*** परिणतरूपं लिख्यताम्। 2×5

   (a) कारक + टाप्।

   (b) भीरु + ऊङ्।

   (c) युवन् + ङीप्।

   (d) गो + ङीष्।

   (e) भवत् + ङीप्।

   (f) मत्स्य + ङीष्।

   (g) पचत् + ङीप्।

MURALIDHAR GIRLS' COLLEGE
LIBRARY

**Section – B**

**(Marks : 15)**

3. अधोलिखितेषु कस्यचित् ***एकस्य*** आशयः स्पष्टीकरणीयः। 7×1

(a) नित्यत्वाद् वुग् गुणवृद्धी बाधते।

(b) लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च।

(c) लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः, आदिभूतादचः परस्य तु द्वितीयस्य।

4. अधोलिखितेषु ***पदद्वयस्य*** साधनप्रक्रिया ससूत्रं प्रदर्श्यताम्। 4×2

(a) भवति।

(b) भवतु।

(c) बभूव।

(d) भविष्यतः।

**Section – C**

**(Marks : 30)**

5. अधोलिखितेषु यथेच्छं ***त्रीणि*** सूत्राणि व्याख्येयानि। 5×3

(a) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

(b) एङ्ह्रस्वात् सम्बुद्धेः।

(c) आदेशप्रत्यययोः।

(d) सरूपाणामेकशेष एकविभक्तौ।

(e) ङ्याप्प्रातिपदिकात्।

(f) सर्वादीनि सर्वनामानि।

6. कस्यच***नैकस्य*** आशयः स्पष्टीकरणीयः। 7×1

(a) पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम्।

(b) "अतो गुणे" इति हि "पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्" इति न्यायेन "अकः सवर्णे दीर्घः" इत्यस्यैवापवादः, न तु "प्रथमयोः"– इत्यस्यापि।

7. अधोलिखितेषु ***पदद्वयस्य*** साधनप्रक्रिया ससूत्रं प्रदर्श्यताम्। 4×2

(a) रामः।

(b) रामेण।

(c) रामेषु।

(d) सर्वौ।

---